पृथ्वीं निनदे च षष्ठे भीः सप्तमे स्यादिफलोऽष्टमस्तु” “क्षेमलाभपुनरागमनानां निश्चयं समधिगम्य विशङ्कः। येन याति पथिकः परदेशं तं शिवारुतमथ प्रथयामः। यं यं देशं गन्तुमभ्युद्यतानां पुंसां शब्दानुच्चरन्ती शृगाली। शान्तायां वा सिद्धये वाञ्छितानां दीप्तायान्तु स्यादभीष्टक्षयाय। प्राचीं दिशं सम्मुखभानुबिम्बं प्रतिष्ठमानस्य नरस्य यस्य। शब्दं शृगाली पुरतः करोति बन्धं वधं वा प्रकरोति तस्य। प्राचीदिगीशाभिमुखस्य पुंसः प्रस्थानकामस्य शिवा सशब्दा। श्रियेऽर्थनाशाय च दक्षिणा स्याद्वामा पुनर्वाञ्छितकार्य्यसिद्ध्यै। प्रत्यक्षमाशां चलितस्य पूर्वां शिवा विरावं पुरुषस्य यस्य। करोति पृष्ठे प्रकरोति तस्य सर्वप्रकाराभिमतार्थसिद्धिम्। प्रस्थायिनो यस्य च दक्षिणाशां शिवा रुतं मुञ्चति दक्षिणेन। आदित्यमुक्ता यदि नो तदानीं ध्रुवं भवेत्तस्य महीपतित्वम्। वैवस्वताशाचलितस्य यस्य दिवाकरस्तिष्ठति दक्षिणेन। शिवा च वामा कुरुते विरावं सम्पद्यते तस्य समस्तमिष्टम्। पुमान् यदा याम्यककुप्प्रवासी करोति शब्दं पुरतः शृगाली। आस्ते विवस्वानपि सम्मुखश्चेत् भवेत् तदानीमचिरेण मृत्युः। नरस्य याम्यां ककुभं यियासोः शृगालभार्य्या यदि पृष्ठभागे। फेत्कारमामुञ्चति मानवस्य मृत्युः पुरो वा भवत्यवश्यम्। दिशं प्रतीचीं व्रजतः शृगाली नरस्य यस्याभिमुखी विरौति। शान्तास्थिता शान्तफलप्रदात्री दीप्तास्थिता दीप्तफलं तनोति। प्राचेतसीं सञ्चलितस्य काष्ठां शृगालिका जल्पति दक्षिणेन। यदा तदानीं सुबहूननर्थान् करोति चार्थानपि हन्ति पुंसः। दिशं प्रचेतःपरिपाल्यमानां नरस्य यस्य व्रजतः शृगाली। वामा विरावं प्रकरोति शान्ता भवन्त्यभिप्रेतफलानि तस्य। यो वारुणीं याति दिशं मनुष्यः शृण्वन् शिवायारटितानि पृष्ठे। गतस्य तस्याशु हुताशभीतिरसंशयं स्यात् दुर्विषमृत्युश्च। यस्योत्तराशां चलितस्य पुंसः प्राच्यां शिवा मुञ्चति फेत्कृतानि। भानुः प्रतीच्यां विहितास्थितिश्चेदपेक्षितं सिध्यति तत्क्षणेन। समुत्सुदीचीं चलितस्य पृष्ठे शिवा विरावं पुरुषस्य यस्य। आस्ते च मध्ये नभसो विवस्वांस्तस्यार्थहानिर्मरणं प्रदिष्टम्। कुबेरकाष्ठां प्रति यः प्रयाति ज्वालामुखी चाभिमुखी विरौति। तस्याध्वगस्याभिमतार्थसिद्धिर्भवेच्च सम्पत् पुनरागमश्च। तिष्ठति तीव्रकरो दिशि यस्यां फेत् कुरुते यदि तत्र शृगाली। तद्व्रजतः पथिकस्य भवेतां निश्चयतो धनजीवितनाशौ। दक्षिणतः प्रथमं यदि पश्चात् वामगता पथिकस्य शृगाली। फेत् कुरुते कुरुते तदवश्यं क्षेमधनाप्तिमभीष्टागमनानि। आशास्य शान्तां ककुभं नरस्य वामा शृगाली यदि वा रटन्ती। तदार्थलाभं वितरत्यवश्यमर्थक्षयं दक्षिणतो रटन्ती। वामा प्रदीप्ते ककुभः प्रदेशेऽलाभं तथानर्थमुपादिशन्ति। शिवा रटन्ती पथि दक्षिणा तु क्षिपत्यनर्थानथ सङ्कटेषु। शान्ते दिगन्ते यदि वा प्रदीप्ते पृष्ठे प्रयाणे प्रतिषेधयित्री। शब्दायमाना तु शिवा पुरस्तात् निमज्जयत्यापदगाधसिन्धौ। वामेऽपसव्ये पुरतोऽथ पृष्ठे पुंसः शिवा जल्पति यत्र तत्र। आयान्ति चौराः प्रथमे विरावे द्वयोर्भवेत्तस्करदर्शनञ्च। नृपादरोऽर्थागमनं तृतीये तुर्य्ये क्षतिः पञ्चमकेऽर्थलाभः। वाणिज्यसेवादिफलाय षष्ठे भीः सप्तमे स्यादिफलोऽष्टमस्तु। हाहारवं मुञ्चति हृष्टभावा हास्यं तु तस्यास्तदुदाहरन्ति। अग्रेसरा वा पथि या यियासोः सा द्विप्रकारापि मनोरथाप्त्यै। नृपस्य यात्रासमये पुरस्तात् प्रयाति चेद्वर्त्मनि वेदयन्ती। कुर्य्याच्छिवा वैरिपराभवं तज्जयश्रियश्चाभिमतं विदध्यात्। कार्य्यान्तरेष्वप्यनुगम्यमाना श्रेयःप्रदा शान्तदिशि प्रदिष्टा। शिवा प्रदीप्ते तु दिशि प्रदेशे समारटन्ती महते भयाय। भयोद्गमे दीप्तदिशि प्रदीप्तैर्नादैर्न्दयां हन्ति भयानि देवी। महान्ति सर्वाण्यपि, शान्तनादा शान्तस्थिता सर्वभयप्रदात्री। यदा च नद्युत्तरगा नराणां शब्दं शृगाली कुरुते कदाचित्। तटद्वये तत्परिरक्षणीयं महद्भयं भावि जलेचरेभ्यः”। “स्थानस्थितानामपि योगभाजां नैमित्तिकानामुपदिश्यते तु। शिवाविरावैरशिवं शिवञ्च सुनिश्चितार्थं मुनिसम्मतेन। करोति फे फे इति सर्वदिक्षु यदा तदा स्थानविघातयुक्ते। शिवा विधत्ते क्षुधिता त्वसंख्यान् रौद्रान् स्वरान् मुञ्चति चेदुपेक्षाम्। निरन्तरं रौति विदिक्षु दिक्षु समन्दकारुण्यस्वरातुरा चेत्। अपत्यमोहेन यदा शृगाली त्यक्तस्पृहा सा कथितेह तज्ज्ञैः। स्थित्वा प्रदीप्ते ककुभो विभागे ज्वालामुखी फेत्कुरुतेऽतिरौद्रम्। ग्रामस्य तस्य प्रकरोति नाशं तस्याथ वा तिष्ठति यस्य मध्ये। ग्रामस्य मध्यं समवाप्य यस्य ज्वालामुखी मुञ्चति फेत्कृतानि। स शून्यतां गच्छति निश्चयेन लोकस्य वा स्यादसुखं प्रभूतम्। ग्रामान्तिके सप्तदिनानि यावत् महाभयोत्पादितफेत्कृतानि। विरौति चेत्तत् कुरुते शृगाली तद्वाहिलोकस्य भयं